भृङ्गरजः भृङ्गराजः भङ्गरा इति लोके । क्षीरकाकोल्या अलाभे अश्वगन्धामूलं ग्राह्यम् ॥ मधुपर्ण्यं च जलजं यष्टीमधु चक्षुष्यत्वात् । तद्-लाभे सामान्यं यष्टीमधु ग्राह्यं तुल्यगुणत्वात् ॥ त्रिफलाद्यं घृतम् ॥ * ॥

शतमेकं हरीतक्या द्विगुणञ्च विभीतकम् ।
चतुर्गुणं त्वामलकं वृषमार्कवयोः समम् ॥
चतुर्गुणोदकं दत्त्वा शनैर्मृद्वग्निना पचेत् ।
भागं चतुर्थं संरक्ष्य क्वाथं तमवतारयेत् ॥
शर्करा मधुकं द्राक्षा मधुयष्टिर्निदिग्धिका ।
काकोली क्षीरकाकोली त्रिफला नागकेशरम् ॥
पिप्पली चन्दनं मुस्तं त्रायमाणामथोत्पलम् ।
घृतप्रस्थसमं क्षीरं कल्कैरेतैः शनैः पचेत् ॥
हन्यात् सतिमिरं काचं नक्तान्ध्यं शुक्रमेव च ।
तथा स्रावञ्च कण्डूञ्च श्वयथुञ्च कषायताम् ॥
कलुषत्वञ्च नेत्रस्य विधर्म्मपटलान्वितम् ।
बहुनात्र किमुक्तेन सर्व्वान् नेत्रामयान् हरेत् ॥
यस्य चोपहता दृष्टिः सूर्य्यांशुभिर्भृशं प्रपश्यतः ।
तस्यैतद्वीक्षणं प्रोक्तं मुनिभिः परमं हितम् ॥
मार्ज्जितं दर्पणं यद्वत् परां निर्म्मलतां व्रजेत् ।
तद्वदेतेन पीतेन नेत्रं निर्म्मलतामियात् ॥
वारिद्रोणद्वयं चात्र वृषमार्कवयोस्तुले ।
काकोलीयुगलालाभे अश्वगन्धामूलं ग्राह्यम् ॥
द्वितीयं त्रिफलाद्यं घृतम् ॥ * ॥
वासाविश्वाम्लताद्राव्वीरक्तचन्दनचित्रकैः ।
भूनिम्बनिम्बकटुकापटोलत्रिफलाम्बुदैः ॥
निशाकलिङ्गकुटजैः क्वाथः सर्व्वाक्षिरोगहा ।
वैस्वर्य्यं पीनसं श्वासं कासं नाशयति ध्रुवम् ॥
वासादिक्वाथः ।

इति नेत्ररोगाधिकारः ।" इति भावप्रकाशः ॥ * ॥ किञ्च । गारुड़े १६८ अध्याये ।

"कतकस्य फलं शङ्खं सैन्धवं त्र्यूषणं वचा ।
फेनो रसाञ्जनं क्षौद्रं विड़ङ्गानि मनःशिला ॥
एषां वर्त्तिर्हन्ति काचं तिमिरं पटलं तथा ॥"

तिमिररिपुः, पुं, (तिमिरस्य अन्धकारस्य रिपुः ।) सूर्य्यः । इति हलायुधः ॥

तिमिषः, पुं, ग्राम्यकर्क्कटी । इति त्रिकाण्डशेषः ॥ नाटाम्रः । इति हारावली । १२६ ॥

तिमीः, पुं, (तिमिः पृषोदरादित्वात् साधुः ।) तिमिमत्स्यः । इति द्विरूपकोषः ॥ (तिमि + वा ङीष् । तिमिजातिस्त्री । इति केचित् ॥)

तिरः, [स्] व्य, (तरति दृष्टिपथमिति । तॄ + "सर्व्व-धातुभ्योऽसुन् ।" उणां । ४ । १८८ । इति असुन् । क्वचिदपवादविषयेऽप्युत्सर्गोऽभिनिविशते इति गुणविषये इर् ।) अन्तर्द्धानम् । (यथा, भाग-वते । २ । ६ । ४१ ।

"यदा तदेवासत्तर्कैस्तिरोधीयेत विप्लुतम् ॥")

तिर्य्यगर्थः । इत्यमरः । ३ । ४ । २२५ ॥ तिर-स्कारः । इति तट्टीकायां स्वामी ॥

तिरश्ची, स्त्री, (तिर्य्यक्जातिः स्त्रियां ङीप् ।) पशुपक्ष्यादीनां स्त्री । इति मुग्धबोधम् । मादी इति भाषा ॥

तिरस्करिणी, स्त्री, (तिरोऽन्तर्धानं करोतीति । तिरस् + कृ + "नन्दिग्रहीति ।" ३ । १ । १३४ । इति णिनिः । संज्ञापूर्व्वकविधेरनित्यत्वात् वृद्ध्य-भावः । ततो ङीप् ।) यवधायकपटः । इत्य-मरः । २ । ६ । १२० ॥ कानात् इति भाषा ॥ (यथा, कुमारे । १ । १४ ।

"यत्रांशुकाक्षेपविलज्जितानां
यदृच्छया किम्पुरुषाङ्गनानाम् ।
दरीगृहद्वारविलम्बिबिम्बा-
स्तिरस्करिण्यो जलदा भवन्ति ॥")

तिरस्कारः, पुं, (तिरस् + कृ + घञ् ।) अना-दरः । इति हलायुधः ॥ (यथा, पञ्चदशी । ७ । ८ ।

"भर्त्तारस्य तिरस्कारात् अधिष्ठानप्रधानता ।
यदा तदा चिदात्माहमसङ्गोऽस्मीति बुध्यते ॥")

तिरस्कारिणी, स्त्री, (तिरोऽन्तर्धानं करोतीति । तिरस् + कृ + णिनिः ङीप् ।) तिरस्करिणी । इत्यमरटीकायां नीलकण्ठः ॥

तिरस्कृतः, त्रि, (तिरस् + कृ + क्तः ।) अना-दृतः । कृततिरस्कारः । यथा,—

"अविवक्षितवाच्यो यस्तत्र वाच्यं भवेद्ध्वनौ ।
अर्थान्तरे संक्रमितमत्यन्तं वा तिरस्कृतम् ॥"
इति भावप्रकाशः ॥

(तन्त्रसारोक्तमन्त्रविशेषे, पुं । यथा,—
"यस्य मध्ये हकारोऽस्ति कवचं भूद्वंनि द्विधा ।
अस्त्रं तिष्ठति मन्त्रः स तिरस्कृत उदीर्य्यते ॥")

तिरस्क्रिया, स्त्री, (तिरस्करणमिति । "कृञः श च ।" ३ । ३ । १०० । इति भावे शः ।) अना-दरः । तिरस्कारः । इत्यमरः । १ । ७ । २२ ॥ (यथा, माघे । १ । ३६ ।

"हरे ! हिरण्याक्षपुरःसरासुर-
द्विपद्विषः प्रसुत सा तिरस्क्रिया ॥")

तिरिटिः, पुं, हस्तग्रन्थिः । इति शब्दमाला ॥

तिरिमः, पुं, शालिभेदः । इति राजनिर्घण्टः ॥

तिरियः, पुं, शालिविशेषः । अस्य गुणाः । मधु-रत्वम् । स्निग्धत्वम् । शीतलत्वम् । दाहपित्त-सर्व्वामयनाशित्वम् । त्रिदोषशमनत्वम् । रुच्य-त्वम् । पथ्यत्वञ्च । इति राजनिर्घण्टः ॥

तिरीटं, क्ली, (तीर्य्यते शिरोविपदोऽनेनेति । तॄ + "कृतृक्षिभ्यः कीटन् ।" उणां ।४।१८४ । इति कीटन् ।) किरीटम् । इत्युणादिकोषः ॥

तिरीटः, पुं, (तॄ + कीटन् ।) लोध्रः । इत्यमरः । २ । ४ । ३३ ॥ (यथा, भावप्रकाशे अर्शोरोगा-धिकारे ।

"समङ्गोत्पलमोचाख्यतिरीटतिलचन्दनैः ॥")

तिरोधानं, क्ली, (तिरस् + धा + भावे ल्युट् ।) अन्तर्धानम् । इत्यमरः । १ । ३ । १३ ॥ (यथा, भागवते । ३ । २१ । ४४ ।

"विद्वान् विद्याधरांश्चैव तिरोधानेन
सोऽसृजत् ॥")

तिरोहितः, त्रि, (तिरस् + धा + क्तः ।) अन्त-र्हितः । (यथा, मार्कण्डेये ।।३६ । २४ ।

"अतीतानागतानर्थान् विप्रकृष्टतिरोहितान् ॥")

आच्छादितः । इत्यमरः । ३ । ८ । ११२ ॥

तिर्य्यक्, [च्] व्य, वक्रम् । तत्पर्य्यायः । साचि २ तिरः ३ । इत्यमरः । ३ । १ । ३४ । (यथा, रामायणे । २ । २३ । ४ ।

"तिर्य्यगूर्द्ध्वं शरीरे च पातयित्वा शिरोधराम् ॥")

तिरोऽर्थः । निरुद्धार्थः । इति शब्दरत्नावली ॥

तिर्य्यक्स्रोताः, [स्] पुं, (तिर्य्यक् वक्रं स्रोत आहारसञ्चारो यस्य । भुक्तान्नस्य तिर्य्यक्तया उदरे सञ्चारादस्य तथात्वम् ।) पशुपक्ष्यादिः । (यथा, विष्णुपुराणे । १ । ५ । ८ ।

"तस्माभिध्यायतः सर्गे तिर्य्यक्स्रोताभ्यवर्त्तत ।
यस्मात् तिर्य्यक्प्रवृत्तः स तिर्य्यक्स्रोतास्ततः
स्मृतः ॥")

स ब्रह्मणोऽष्टमः सर्गः । स तु अष्टाविंशद्विधः । यथा,—

"तिरश्चामष्टमः सर्गः सोऽष्टाविंशद्विधो मतः ॥"

तेषां लक्षणं यथा,—

"अविदो भूरितमसो घ्राणज्ञा हृद्यवेदिनः ॥"
इति श्रीभागवते । ३ । १० । २१ ॥

"तिरश्चां तिर्य्यक्स्रोतसाम् । अविदः श्वस्तनादि-ज्ञानशून्याः । भूरितमसः आहारादिमात्र-निष्ठाः । घ्राणज्ञा घ्राणेनैव इष्टमर्थं जानन्ति । हृदि अवेदिनः दीर्घानुसन्धानशून्याः ।" इति तट्टीकायां श्रीधरस्वामी ॥ अष्टाविंशतिभेदा यथा,—

"गौरजो महिषः कृष्णः शूकरो गवयो रुरुः ।
द्विशफाः पशवश्चेमे अविरुष्ट्रश्च सत्तम ! ॥
खरोऽश्वोऽश्वतरो गौरः शरभश्चमरी तथा ।
एते चैकशफाः क्षत्तः शृणु पञ्चनखान् पशून् ॥
श्वा शृगालो वृको व्याघ्रो मार्ज्जारः शश-
शल्यकौ ।
सिंहः कपिर्गजः कूर्म्मो गोधा च मकरादयः ॥
कङ्कगृध्रवकश्येनभासभल्लूकवर्हिणः ।
हंससारसचक्राह्वकाकोलूकादयः खगाः ॥"
इति श्रीभागवते । ३ । १० । २२-२३ ॥

"गवादय उष्ट्रान्ता द्विशफा द्विखुरा नव । खरादयश्चमर्य्यन्ता एकशफाः षट् । श्वादयो गोधान्ताः पञ्चनखा द्वादश । एते भूचराः सप्तविंशतिः । मकरादयो जलचराः कङ्कादयः खगाः अभूचरत्वेनैकीकृत्य गृहीता एवमष्टा-विंशतिभेदान् वदन्ति । अन्येषामपि तिर्य्यक्-प्राणिनां यथायथमेतेष्वन्तर्भावः ।" इति तट्टी-कायां श्रीधरस्वामी ॥

तिर्य्यग्यानः, पुं, (तिर्य्यक् वक्रं यानं गमनं यस्य ।) कुलीरः । इति त्रिकाण्डशेषः ॥

तिर्य्यङ्, [च्] पुं, (तिर्य्यगञ्चतीति । अन्च + क्विप् । "तिरसस्तिर्य्यलोपे ।" ६ । ३ । ६४ । इति तिरिः ।) विहङ्गादिः । इति मेदिनी ॥ (यथा, महाभारते । १३ । ११ । १२५ ।

"पापानि तु नरः कृत्वा तिर्य्यग् जायेत
भारत ! ॥"